International Journal of Sanskrit Research 2021; 7(1): 196-199

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 196-199
© 2021 IJSR
www.anantaajournal.com
Received: 30-10-2020
Accepted: 11-12-2020

**मानसीमालः**
शोधच्छात्रा, रायगञ्जविश्वविद्यालयस्य, पश्चिम बंगाल, भारत

**Corresponding Author:**
**मानसीमालः**
शोधच्छात्रा, रायगञ्जविश्वविद्यालयस्य, पश्चिम बंगाल, भारत

# पाणिनिव्याकरण-ऋग्वेदप्रातिशाख्ययोः सन्धिविषयकं तुलनात्मकमध्ययनम्

**मानसीमालः**

**संक्षिप्तसारः**
पाणिनिः 'अष्टाध्यायी' इति ग्रन्थे षष्ठाध्यायस्य प्रथमपादे अष्टमाध्यायस्य तृतीयपादे च सन्धिविषयकं विविधसूत्रं रचितवान्। यद्यपि प्रथमाध्याये 'परः सन्निकर्षः संहिता'[1] एतादृशं संहितायाः संज्ञानिर्देशकसूत्रं कृतवान् तथापि परवर्तिकाले रूपमाला-रूपावतार-प्रक्रियाकौमुदीग्रन्थानां प्रक्रियारीतिम् अनुसृत्य भट्टोजिदीक्षितः क्रमानुसारेण सूत्राणां व्याख्यानं न कृत्वा पाणिनिना प्रणीतस्य व्याकरणस्य विविधविषयान् प्रकरणानुसारेण विभाजयामास। तत्र सन्धिविषये व्याख्यानसमये संज्ञापरिभाषाविषयकविविधसूत्राणां प्रयोगं कृत्वा सन्धेः रीतेः व्याख्यां कृतवान्। वैदिकयुगे शौनकेन प्रणीते 'ऋग्वेदप्रातिशाख्यम्' इति ग्रन्थे द्वितीयचतुर्थपटलयोः उक्तवान् - 'संहिता पदप्रकृतिः'[2]। पदपाठ एव मूलप्रकृतिः कारणं वा यत् संहितारूपविषये विकारं प्राप्नोति। पाणिनिना प्रणीते 'अष्टाध्यायी' इति ग्रन्थे, शौनकेन प्रणीते च 'ऋग्वेदप्रातिशाख्यम्' इति ग्रन्थे सन्धिविषयिणी पर्यालोचना वर्तते। द्वयोः ग्रन्थयोः सन्धिविषयकपर्यालोचनम् अध्ययनं च सम्यक्तया कृत्वा सादृश्यं वैसादृश्यञ्च दृष्टम्। द्वयोः ग्रन्थयोः सन्धिविषयकं तुलनात्मकमध्ययनमिति गवेषणापत्रस्य विषयवस्तु। पाणिनिव्याकरणस्य विशेषतया लक्षणीयं यथा माहेश्वरसूत्रेण प्रत्याहारनिर्माणं, संज्ञापरिभाषादिनियमेन सन्धिसूत्राणि प्रयुक्तानि। ये विषयाः शौनकेन विरचिते 'ऋग्वेदप्रातिशाख्यम्' इति ग्रन्थे भिन्नरूपेण वर्तन्ते।

**मुख्यशब्दाः** – संहिता, स्वरसन्धिः, व्यञ्जनसन्धिः, विसर्गसन्धिः, विविधविषयकसन्धिः, स्वादिसन्धिः।

**भूमिका** –
वैयाकरणसम्प्रदायेषु प्रधानकेन्द्रबिन्दुरस्ति महामतिः पाणिनिः। तस्य विरचितः श्रेष्ठो व्याकरणग्रन्थोऽस्ति अष्टाध्यायी। इतरे व्याकरणग्रन्थाः सन्तोऽपि पाणिनिना विरचितेषु अष्टाध्यायी इति व्याकरणग्रन्थेषु विशिष्टं स्थानं बिभर्त्ति। सः अस्मिन् ग्रन्थे सूत्रेण सन्धिकारकसमासप्रभृतिविषयाणां विज्ञानसम्मतरूपेण उपन्यस्तं कृतवान्। इमं ग्रन्थं परिपूर्णताप्रदानं कृतवान् वार्त्तिकेन महाभाष्येण च। परवर्तिकाले भट्टोजिदीक्षितः 'वैयाकरणसिद्धान्तकौमुदी' इति ग्रन्थे पाणिनिप्रोक्तानां विविधविषयाणां प्रकरणानुसारेण विन्यासं चकार। पाणिनिः तस्य ग्रन्थे वैदिकलौकिकव्याकरणविषये सूत्राणि विरचितवान्। 'अष्टाध्यायी' इति ग्रन्थस्य प्रथमाध्याये पाणिनिना केवलमात्रं सन्धेः संज्ञानिर्देशः कृतः। षष्ठाध्यायात् अष्टमाध्यायपर्यन्तं सन्धिविषयकम् आलोचनं वर्तते। पाणिनिस्तस्य ग्रन्थं सूत्राकारेण विन्यस्तं कृतवान्। किन्तु न किञ्चित् उदाहरणं व्याख्यानञ्च कृतवान्।
ऋग्वेदस्य संहिताब्राह्मणयोः संहिताभागे वर्तते 'ऋग्वेदप्रातिशाख्यम्'। अस्मिन् ग्रन्थे वर्णविषयकं व्याख्यानं वर्तते। वैदिकयुगात् मन्त्रं येन रूपेण पाठं कृतवान् तानि मन्त्रपाठानां रूपाणि अविकृतार्थं वर्णस्य सम्यग्रूपेण उच्चारणं, स्वराणां प्रयोगं प्रभृतिना विशुद्धरूपेण कृणोति तस्मात् कारणात् 'ऋग्वेदप्रातिशाख्यम्' इति ग्रन्थः शौनकेन रचितः। अयं ग्रन्थः सूत्रकारिकाभेदेन द्विधा विभक्तः। वेदस्य षण्णां वेदाङ्गानां मध्ये शिक्षा-व्याकरण-छन्दसां नियमः प्रातिशाख्यग्रन्थेषु प्राप्यते। वेदस्य विविधशाखानां रीतिः प्रातिशाख्यग्रन्थेषु प्रतिपादिता। सर्ववेदानां प्रातिशाख्यग्रन्थो वर्तमानः। ऋग्वेदस्य शौनकविरचितः प्रातिशाख्यग्रन्थोऽस्ति। ऋग्वेदप्रातिशाख्यग्रन्थं शौनकः अष्टादशपटलेषु विभक्तं कृतवान्। द्वितीयचतुर्थपटलयोः संहिताविषयकं व्याख्यानं चकाराचार्यः शौनकः।
संस्कृतभाषाशिक्षाणां विविधक्षेत्रेषु व्याकरणस्य ज्ञानमावश्यकम्। व्याकरणस्य एकमूलविषयकमस्ति संहिता सन्धिर्वा। संस्कृपातसाहित्ये यानि पुस्तकानि रचितानि तत्र विविधश्लोककारिकासूत्रप्रभृतिविषये सन्धिबद्धपाठो दृश्यते। फलतः भाषापाठे श्रुतिमाधुर्यं दृश्यते, अपि च, आकर्षणीयतां शुद्धरूपेण प्रयोगः दृश्यते।
वर्णेन सह वर्णस्य मिलनेन सन्धिर्भवति। अतः अयं वर्णविधिः इति मन्यते। व्याकरणेषु साधारणतः सन्धिशब्दस्य प्रयोगो भवति संहिता सन्धानं वा द्विविधार्थेन। सन्धिकार्यं द्विविधशर्ततोपरि वर्तते – क. वर्णद्वयं सान्निध्यं नैकट्यं वा ख. अर्थनिरपेक्षता।

[1] पा.सू. – १/४/१०९
[2] ऋ.प्रा. – २/१

पाणिनिः संहितायाः लक्षणं कृतवान् – 'परः सन्निकर्षः संहिता[3]'। पदद्वयस्य वर्णद्वयोर्मध्ये अथवा एकस्य शब्दस्य पदस्य वा नैकट्ये स्थितं द्विविधवर्णस्य अत्यन्तसान्निध्यं नैकट्यं वा संहितासंज्ञकः भवति। सूत्रे 'परः' शब्दस्यार्थः अतिशयितः अत्यन्तं वा। 'सन्निकर्षः' शब्दस्यार्थः नैकट्यं समीपे तिष्ठति वा। एकस्य वर्णस्य उच्चारणात् परम् अपरवर्णोच्चारणे अर्धमात्रायाः अधिककालस्य व्यवधानं न स्वीक्रियते। अयं भविष्यति अतिशयितनैकट्यं समीपे तिष्ठति वा। साधारणरूपेण सन्निकर्षशब्दस्यार्थः संयोगः सम्बन्धः समवायः सम्बन्धः वा। वर्णेन सह वर्णस्य मिलनेन संयोगसन्निकर्षः न स्वीकरोति। वर्णोऽस्ति शब्दात्मको गुणः। अतः गुणेन सह गुणस्य संयोगसन्निकर्षः न स्वीकरोति। द्वयोः वर्णयोः समवायसम्बन्धः संघटितुं न शक्नोति। अस्य कारणमस्ति वर्णः शब्दात्मकः गुणः। अतः शब्दः आकाशस्य विशेषः गुणः। शब्दस्य अधिकरणम् आश्रयः वा आकाशमस्ति। शब्द इति गुणः आकाशनामकद्रव्ये समवायसम्बन्धे अस्ति। वर्णद्वयस्य अतिशयितसन्निकर्षः सान्निध्यं वा संहिता इत्यभिहितम्। अत्र सन्निकर्षः संयोगसमवायसम्बन्धेन नाभिहितः। सन्निकर्षः इत्युक्तेन नैकट्यम् अभिहितमस्ति। द्वयोः वर्णयोः नैकट्येन सान्निध्येन वा देशकृतदूरत्वं नाभिहितम्। यतो वर्णः कदाचिद् आकृतिरूपं द्रव्यं नास्ति।

अतः द्वयोः वर्णयोः नैकट्येन कालकृतव्यवधानम् अभिहितं भवति। अर्धमात्राकालस्य व्यवधानं सदपि सन्धेः कार्यमस्ति। अर्धमात्रायाः अधिकव्यवधानं स्याच्चेन्न तत्र सन्धिकार्यं घटते।

ततः संहिता इति शब्दस्य विषये व्याख्यायाः प्रयोजनमस्ति। तत्र सम्पूर्वकात् धाधातोः उत्तरं भाववाच्ये क्तप्रत्ययेन अच्प्रत्ययेन च निष्पन्नस्य संहितशब्दस्वरूपस्य स्त्रियां टापि संहिताशब्दो निष्पद्यते। संहितापदस्यार्थः मिलनं भवति।

अत्रालोच्यविषयोऽस्ति पाणिनिना विरचिता अष्टाध्यायी तथा शौनकविरचितम् 'ऋग्वेदप्रातिशाख्यम्' इति अनयोर्ग्रन्थयोः सन्धिविषयकं तुलनात्मकम् अध्ययनम्। पाणिनिना शौनकेन च रचिते ग्रन्थे सन्धिविषये किं किं व्याख्यानं कृतवान् अपि च अनयोः ग्रन्थयोः सन्धिविषये सादृश्यं वैसादृश्यं वा किमस्ति? वैदिकयुगे लौकिकयुगे च सन्धिसम्बन्धितविषये पाणिनिना शौनकेन च पूर्ववर्ती कोऽपि आचार्याणां नाम उल्लेखं कृतवान् वा इत्यस्मिन् विषयान् पाठकजनान् समीपे अवगतं कुर्वन्ति इति मम प्रचेष्टा। वैदिकं लौकिकञ्च उभयव्याकरणग्रन्थयोः सन्धेः गुरुत्वम् अपरिहार्यम्। सूत्रे, श्लोके, समासे च सन्धिः नित्यः। वाक्ये सन्धिकरणं वक्तुः विवक्षासापेक्षम्। नियमो भवति –

> ''संहितैकपदे नित्या नित्या धातूपसर्गयोः।
> नित्या समासे वाक्ये तु सा विवक्षामपेक्षते।।''[4]

वेदे संहिताशब्दस्य प्रयोगो दृश्यते। यथा – ऋग्वेदसंहिता, सामवेदसंहिता, यजुर्वेदसंहिता, अथर्ववेदसंहिता। अत्र संहिताशब्दस्यार्थः साहित्यम्। कृष्णयजुर्वेदस्य तैत्तिरीयोपनिषदः शिक्षावल्ल्यां शिक्षायाः व्याख्याप्रसङ्गे वर्ण-स्वर-मात्रा-साम-सन्तान-संहितादीनां वा व्याख्याप्रसङ्गे पञ्चाधिकरणे विषयप्रसङ्गे उल्लेखं कृतवान्। यथा – अधिलोकः, अधिज्योतिषः, अधिविद्यः, अधिप्रजः, अध्यात्मं वा। इयं महासंहिता इति परिचितास्ति। संहितायामपि पक्षद्वयमस्ति – पूर्वपक्षम् उत्तरपक्षं च। पूर्वपक्षेण सह उत्तरपक्षस्य मिलनं सन्धिः इति कथ्यते। अनयोः मिलनस्य उपायोऽस्ति सन्धानम्। पृथिवीलोकेन सह द्युलोकस्य मिलनभूमिः सन्धिः वा आकाशम् इत्यभिहितम् अपि अनयोः सन्धानमस्ति वायुः। अयम् अधिलोकः इत्यभिहितम्। अधिज्योतिषस्थानानां मध्ये पूर्वरूपमस्ति अग्निः, उत्तररूपमस्ति आदित्यः। अस्य सन्धिः अस्ति जलम्। सन्धानं नाम विद्युत्। अधिविद्यस्य पूर्वरूपमस्ति आचार्यः, उत्तररूपमस्ति शिष्यः। अनयोः सन्धिः विद्या। सन्धानमस्ति प्रवचनम्। अधिप्रजस्य पूर्वरूपं माता, उत्तररूपं पिता, सन्धिः प्रजा, सन्धानमस्ति प्रजननम्। अध्यात्मस्य पूर्वरूपम् अधरहनुः, उत्तररूपम् उत्तरहनुः, सन्धिः वाक्, सन्धानमस्ति जिह्वा।

संहिताशब्दस्य प्रयोगो विविधक्षेत्रेषु दृश्यते। यथा –

१. वेदस्य विभागद्वयमस्ति – कर्मकाण्डं ज्ञानकाण्डं च। वेदस्य कर्मकाण्डं संहिता इति अभिहितम्।
२. चरकसंहितासुश्रुतसंहितादिषु चिकित्साशास्त्रेषु संहिताशब्दो 'ग्रन्थः' इत्यर्थे प्रयुक्तः।
३. वेदे प्रकृतिपाठत्रयम् अस्ति। यथा – संहितापाठः, पदपाठः, क्रमपाठः। अष्टौ विकृतिपाठाः यथा – जटापाठमालापाठप्रभृतयः। अनयोः संहितापाठम् अन्यतमः अस्ति।
४. मनुसंहितायाज्ञवल्क्यसंहिताप्रभृतिषु शास्त्रेषु संहिताशब्दस्य प्रयोगो दृश्यते ग्रन्थार्थे।

शौनकः संहिताविषये उक्तवान् – 'संहिता पदप्रकृतिः'[5]। पदमूलकः पदपाठो वा संहिता इत्यभिहितम्। प्रातिशाख्यकारः शौनकः पदपाठः प्रधानविषयोऽस्ति मन्यते। पदपाठात् विशुद्धसंहितापाठः प्राप्यते। शौनकः उक्तवान् संहिता अस्ति पूर्ववर्तिपदस्य शेषवर्णात् परवर्तिपदस्य पूर्ववर्णस्य सन्धिकार्यं कुर्वन् अग्रसरं भवति। सन्धिकार्यार्थं कालस्य व्यवधानम् अधिकं नास्ति। द्वयोः स्वरयोः व्यवधानं विवृत्तिः इति अभिहितम्। स्वरभक्तेः उच्चारणे यादृशः कालः अपेक्षितः, ततोऽधिककालः अपेक्षितः विवृत्तेरुच्चारणे। पदपाठे आद्यन्तवर्णयोः परिवर्तननियमः प्रयुक्तोऽस्ति। सन्धिकार्यं क्रमानुसारेण भविष्यति। यथा- इन्द्र +आ+ इहि = इन्द्रा +इहि = इन्द्रेहि। अनेन रूपेण सन्धिकार्यं संघटितम् अस्ति शौनकेन अभिहितम्। प्रातिशाख्यकारः शौनकः संहितां विविधक्षेत्रेषु श्रेणीकरणं कृतवान् –

१. स्वरेण सह स्वरस्य सन्धिः प्रश्लिष्टः, क्षैप्रः, भुग्नसन्धिः प्रभृति-विविधनाम्ना अभिहितम्।
२. पूर्वे स्वरवर्णः पश्चात् व्यञ्जनवर्णः यदि प्रयुक्तो भवति तर्हि अनुलोम-अन्वक्षरसन्धिः भवति।
३. व्यञ्जनस्वरयोः सन्धेः नाम प्रतिलोम-अन्वक्षरसन्धिः।
४. द्वयोः व्यञ्जनयोः सन्धिः वशंगमोऽवशंगमश्च।

सन्धेः विविधभेदाः प्रातिशाख्यग्रन्थेषु दृश्यन्ते।

**स्वरसन्धेः विविधविभाजनम्**

१. प्रश्लिष्टसन्धिः २. क्षैप्रसन्धिः ३. पदवृत्तिसन्धिः ४. उद्ग्राहसन्धिः ५. उद्ग्राहपदवृत्तिसन्धिः ६. भुग्नः सन्धिः ७. उद्ग्राहवत्सन्धिः ८. प्राच्यपञ्चाल-पदवृत्तिसन्धिः ९. अभिनिहितः सन्धिः १०. प्रगृहीतपदः सन्धिः ११. प्लुतोपधा सन्धिः १२. निपातने सिद्धः सन्धिः १३. विवृत्तिः सन्धिः

**व्यञ्जनसन्धेः विविधविभाजनम्**

१. अनुलोम-अन्वक्षरः सन्धिः २. प्रतिलोम-अन्वक्षरः सन्धिः ३. वशंगम आस्थापितः सन्धिः ४. अवशंगमः आस्थापितः सन्धिः ५. परिपन्नसन्धिः ६. अन्तःपातः सन्धिः ७. निपातने सिद्धः सन्धिः

**विसर्गसन्धेः विभाजनम्**

१. पदवृत्तिः सन्धिः २. उद्ग्राहः सन्धिः ३. नियतप्रशितः सन्धिः ४. रेफी सन्धिः ५. अकामनियतः सन्धिः ६. व्यापन्नः ऊष्मसन्धिः ७. विक्रान्तसन्धिः ८. अन्वक्षरवक्त्रः सन्धिः ९. उपाचरितः सन्धिः १०. निपातने सिद्धः सन्धिः।

**विविधविषयकस्य विभाजनम्**

१. आनपदपदवृत्तिः सन्धिः २. स्पर्शरिफः सन्धिः ३. स्पर्शोष्मः सन्धिः ४. शौद्धाक्षरः सन्धिः

अष्टाध्याय्यां पाणिनिः सन्धिविषये यानि सूत्राणि प्रणीतानि तत्र केवलं संहितायाः संज्ञानिर्देशः कृतः। संहितायाः किमपि श्रेणीकरणं नास्ति। परन्तु सूत्राणि यदि

[3] पा. – १/४/१०९

[4] पाणिनीय शब्दशास्त्र, सत्यनारायणचक्रवर्ती, पृ. - ३२

[5] ऋ.प्रा. – २/१

सम्यग्रूपेण अध्ययनं करोति तर्हि ज्ञापितुं यत् सन्धेः चातुर्विध्यमस्ति – अच्सन्धिः (स्वरसन्धिः), हल्सन्धिः (व्यञ्जनसन्धिः), विसर्गसन्धिः, स्वादिसन्धिः।
पाणिनेः मतानुसारेण सन्धिविषयकाणि विविधानि सूत्राणि निम्ने वर्णितानि –

**स्वरसन्धिः (अच्सन्धिः)**

१. पूर्वस्वरविकारः - 'इको यणचि'[6], 'एचोऽयवायावः'[7]
२. लोपसन्धिः - 'लोपः शाकल्यस्य'[8]
३. उभयविकारः एकादेशः - 'आद्गुणः'[9], 'वृद्धिरेचि'[10], 'उपसर्गादृति धातौ'[11], 'वा सुप्यापिशलेः'[12]
४. पररूप एकादेशः - 'एङि पररूपम्'[13], 'ओमाङोश्च'[14]
५. सवर्णदीर्घः - 'अकः सवर्णे दीर्घः'[15]
६. पूर्वरूप एकादेशः - 'एङः पदान्तादति'[16], 'सर्वत्र विभाषा गोः'[17], 'अवङ् स्फोटायनस्य'[18], 'इन्द्रे च'[19]।
७. प्रकृतिभावः - 'प्लुतप्रगृह्या अचि नित्यम्'[20], 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च'[21], 'ऋत्यकः'[22]।

**व्यञ्जनसन्धिः**

१. विविधविषयकम् - 'स्तोः श्चुना श्चुः'[23], 'ष्टुना ष्टुः'[24] 'न पदान्ताट्टोरनाम्'[25], 'तोः षि'[26], 'शात्'[27], 'यरोऽनुनासिकेऽनुनासिको वा'[28] 'झलां जशोऽन्ते'[29], 'तोर्लि'[30]।
२. पूर्वसवर्णविधिः - 'उदः स्थास्तम्भोः पूर्वस्य'[31], 'शश्छोऽटि'[32]
३. अनुस्वारविधिः - 'मोऽनुस्वारः'[33], 'मो राजि समः क्वौ'[34]
४. सन्धिज-आगमः - 'ङ्णोः कुक्टुक् शरि'[35]
५. रू आदेशः - 'समः सुटि'[36], 'विसर्जनीयस्य सः'[37]
६. अयोगवाहः - 'पुमः खय्यम्परे'[38], 'नश्छव्यप्रशान्'[39]
७. तु आगमः - 'छे च'[40]

**विसर्गसन्धिः**

१. 'सोऽपदादौ'[41] २. 'इणः षः'[42] ३. 'नमस्पुरसोर्गत्योः'[43] ४. 'इसुसोः सामर्थ्ये'[44] ५. 'अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य'[45]

**स्वादिसन्धिः**

१. 'एतत्तदोः सुलोपोऽकोरनञ् समासे हलि'[46]
२. 'ससजुषो रुः'[47]
३. 'अतो रोरप्लुतादप्लुते'[48]
४. 'भोभगोअघोअपूर्वस्य योऽशि'[49]
५. 'हशि च'[50]
६. 'रो रि'[51]
७. 'रोऽसुपि'[52]

उपर्युक्तानां निर्देशानां सूत्रैः विना सन्धिविषयकाणि विविधानि सूत्राणि पाणिनिना विरचितायाम् अष्टाध्याय्यां दृष्टानि। न केवलं लौकिकसन्धेः वैदिकसन्धेरपि नियमविधायकानि कानिचित् सूत्राणि ग्रन्थे उपलभ्यानि।
अष्टाध्यायी-ऋग्वेदप्रातिशाख्ययोः सन्धिविषयकं तुलनात्मकं सम्यग्रूपेण पर्यालोचनं कृत्वा ये विषयाः प्राप्यन्ते ते निम्ने आलोचनायां प्रदत्ताः सन्ति –

१. प्रातिशाख्ये प्रश्लिष्टसन्धिविषये शौनकेन यत् उक्तम् 'अष्टाध्यायी' इति ग्रन्थे पाणिनिः तद्विषये सवर्णदीर्घादेशः, गुणः, वृद्धिः इत्युक्तवान्।
२. प्रातिशाख्ये स्वरसन्धिविषये शौनकः क्षैप्रसन्धिः, पदवृत्तिः सन्धिः, उद्ग्राहसन्धिः, भुग्नसन्धिः चेति नाम्ना अभिहितवान्। येषां खलु विषयाणां पाणिनिमतेन सह सादृश्यं लक्ष्यते। पाणिनिः स्वरसन्धिविषये कमपि नामव्यवहारं न कृतवान्। परन्तु विचारविश्लेषणेन प्राप्यते शौनकस्य मतेन सह सादृश्यमस्ति।
३. व्यञ्जनसन्धिविषये विसर्गसन्धिविषये पाणिनिना सह शौनकस्य अभिमतस्य सादृश्यं वैसादृश्यं च दृश्यते।
४. प्रातिशाख्ये सन्धेरभावः अर्थात् प्रकृतिभावं विवृत्तिः सन्धिः इत्यभिहितः। पाणिनिना अभिहितः यत् सन्धेरभावोऽस्ति प्रकृतिभाव इति।
५. शौनकेन मतानुसारेण सन्धिः क्रमानुसारेण भवति। यथा इन्द्र+आ+इहि = इन्द्र+एहि = इन्द्रेहि।

उपर्युक्तानां निर्देशानां नियमं विनापि विविधा विषयाः पाणिनिना मतानुसारेण सह शौनकस्य मतविषये सादृश्यं वैसादृश्यञ्च दृष्टम्। केवलं संक्षेपेण केचिद् विषयाः वर्णिताः।

**उपसंहारः**

शौनकेन कथितम् 'ऋक्प्रातिशाख्यम्' विना सन्धेः नियमरीतिविषये कृष्णयजुर्वेदस्य तैत्तिरीयप्रातिशाख्ये, वाजसनेयीप्रातिशाख्ये, याज्ञवल्क्यशिक्षायां प्रभृतिग्रन्थे व्याख्यां कृतवान्। परवर्तिकाले पाणिनिसम्प्रदायमपरं व्याख्याकारगणो व्याकरणसम्प्रदायगणः

---

[6] पा.सू. – ६/१/७७
[7] पा.सू. – ६/१/७८
[8] पा.सू.- ८/३/१९
[9] पा.सू. – ६/१/८७
[10] पा.सू. – ६/१/८८
[11] पा.सू. – ६/१/९१
[12] पा.सू. - ६/१/९२
[13] पा.सू. – ६/१/९४
[14] पा.सू. – ६/१/९५
[15] पा.सू. – ६/१/१०१
[16] पा.सू. – ६/१/१०९
[17] पा.सू. – ६/१/१२२
[18] पा.सू. – ६/१/१२३
[19] पा.सू. – ६/१/१२४
[20] पा.सू. – ६/१/१२५
[21] पा.सू. – ६/१/१२७
[22] पा.सू. – ६/१/१२८
[23] पा.सू. – ८/४/४०
[24] पा.सू. – ८/४/४१
[25] पा.सू. – ८/४/४२
[26] पा.सू. – ८/४/४३
[27] पा.सू. – ८/४/४४
[28] पा.सू. – ८/४/४५
[29] पा.सू. – ८/२/३९
[30] पा.सू. – ८/४/६०
[31] पा.सू. – ८/४/६१
[32] पा.सू. – ८/४/६३
[33] पा.सू. – ८/३/२३
[34] पा.सू. – ८/३/२५
[35] पा.सू. – ८/३/२८
[36] पा.सू. – ८/३/५
[37] पा.सू. – ८/३/३४
[38] पा.सू. – ८/३/६
[39] पा.सू. – ८/३/७
[40] पा.सू. – ८/१/७३
[41] पा.सू. – ८/३/३८
[42] पा.सू. – ८/३/३९
[43] पा.सू. – ८/३/४०
[44] पा.सू. – ८/३/४४
[45] पा.सू. – ८/३/४६
[46] पा.सू. – ६/१/१३२
[47] पा.सू. – ८/२/६६
[48] पा.सू. – ६/१/११३
[49] पा.सू. – ८/३/१७
[50] पा.सू. – ६/१/११४
[51] पा.सू. – ८/३/१४
[52] पा.सू. – ८/२/६९

शौनकेन कथितेन सन्धेः नियमरीतिः न स्वीकरोति। शौनकस्य सन्धिविषयकनियमेन सह पाणिनिप्रोक्तानां नियमानां किञ्चित् सादृश्यं दृश्यते। पाणिनिव्याकरणस्य एकं विशेषवैशिष्ट्यमस्ति – माहेश्वरसूत्रप्रयोगेण विविधप्रत्याहारनिर्माणम्। संज्ञापरिभाषाप्रभृतिनियमानां माध्यमेन सूत्राणि नूतनत्वप्रदानं कृणोति। अस्मात् कारणात् पाणिनिव्याकरणमधिकं तथ्यबहुलं च इति मान्यते। किन्तु शौनकः प्रातिशाख्ये सन्धिविषये केवलमात्रं सूत्र-कारिकामाध्यमेन व्याख्यां कृतवान्।
सन्धिः इत्युक्ते केवलमात्रं वर्णेन सह वर्णस्य मिलनं नास्ति। अस्याः पुनरपि एकं वैशिष्ट्यमस्ति तदपि अनुमानेन प्राप्यते। प्राचीनकाले नृपाणां मध्ये सन्धेः मित्रतायाः वा बन्धनं दृष्टम्। विश्वसंसारेषु अपि अस्याः परिणामो दृष्टः।
मनुष्यसमाजे अनेके जीवाः सन्ति। न हि कश्चिद् एकाकी जगति जीवनधारणं कर्तुं शक्नोति। सर्वे परतन्त्ररूपेण सन्ति। तेषां मध्ये किञ्चिद् ऐक्यं परिलक्ष्यते।। केवलं मनुष्येषु एतत् साम्यं लक्ष्यते न तु जगतः सर्वप्राणिषु। अतः सन्धेः धारणा विश्वसंसारेषु विविधक्षेत्रेषु प्रतिफलिताऽस्ति।

**सहायकग्रन्थसूची**


1. अधिकारी, तारकनाथ, शौनकीय ऋग्वेद प्रातिशाख्य, संस्कृत वुक् डिपो, कोलकाता, २०१४
2. चक्रवर्ती, सत्यनारायण, अष्टाध्यायीसूत्रपाठः, संस्कृत पुस्तक भाण्डार, कोलकाता, १२ वैशाख, २०१२
3. चक्रवर्ती, सत्यनारायण, पाणिनीयशब्दशास्त्र, संस्कृत पुस्तक भाण्डार, कोलकाता, २०१०
4. चट्टोपाध्याय, अमरकुमार, ऋग्वेद प्रातिशाख्य, संस्कृत पुस्तक भाण्डार, कोलकाता, २०१६
5. जाना, सुनीलकुमार, वैयाकरणसिद्धान्तकौमुदी (सन्धिप्रकरण), संस्कृत वुक् डिपो, कोलकाता, २०११
6. दास, करुणासिन्धु, वैयाकरणसिद्धान्तकौमुदी (सन्धिप्रकरणम्), संस्कृत पुस्तक भाण्डार, कोलकाता, २००४
7. भट्टाचार्य, तपनशङ्कर, अष्टाध्यायी, संस्कृत वुक् डिपो, कोलकाता, २०१७,
8. भट्टाचार्य, तपनशङ्कर, लघुसिद्धान्तकौमुदी, संस्कृत वुक् डिपो, कोलकाता, २००६
9. मण्डल, अरुणकुमार, लघुसिद्धान्तकौमुदी, श्रीलक्ष्मी प्रेस, स्टेशन रोड, वोलपुर, वीरभूम, २००३
10. वर्मा, वीरेन्द्रकुमार, ऋग्वेदप्रातिशाख्य, काशी हिन्दु विश्वविद्यालय, शोध प्रकाशन, वाराणसी, १९७२
11. हालदार, गुरुपद, व्याकरण दर्शनेर इतिहास, संस्कृत वुक् डिपो, कोलकाता, २००६